International Journal of Sanskrit Research 2021; 7(1): 312-314

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2021; 7(1): 312-314
© 2021 IJSR
www.anantaajournal.com
Received: 02-11-2020
Accepted: 12-12-2020

**उत्तमकुमारवेरा**
शोधछात्रा,
विद्यासागरविष्वविद्यालयस्य,
विद्यासागर विश्वविद्यालय, मिदनापुर,
पश्चिम मिदनापुर, पश्चिम बंगाल,
भारत

**Corresponding Author:**
**उत्तमकुमारवेरा**
शोधछात्रा,
विद्यासागरविष्वविद्यालयस्य,
विद्यासागर विश्वविद्यालय, मिदनापुर,
पश्चिम मिदनापुर, पश्चिम बंगाल,
भारत

# मनुस्मृतौ ब्राह्मण्यधर्मस्यापप्रयोगः एकं समीक्षणम्

## उत्तमकुमारवेरा

### प्रस्तावना

मनुष्यः सामाजिकः जीवः। तत्र समाजस्य हितसाधने सर्वेषां मनुष्याणां बहुविधं दायित्वं वर्तते। ते यदि स्वदायित्वपालने विमुखा भवन्ति तथा स्वदायित्वं न पालयन्ति चेत् समाजव्यवस्था सम्यक्तया चलितुम् असमर्था भवन्ति। समाजव्यवस्थां सुष्ठुतया परिचालनार्थं पण्डिताः शास्त्रं प्रणितवन्तः। शिष्यते अनेन इति शास्–धातोरुत्तरं ष्ट्रन्प्रत्ययेन शास्त्रमिति शब्दः निष्पद्यते। शास्त्रेषु धर्मशास्त्रम् अन्यतमं श्रेष्ठञ्च। वैदिकशास्त्रस्य परवर्तिकाले तद्भूतस्मृतिशास्त्रस्य युगं प्रारभ्यते। इदं स्मृतिशास्त्रं तु तत्काले धर्मशास्त्ररूपेण परिचीयते। याज्ञवल्क्यस्मृतौ विंशत्यधिकानां धर्मशास्त्रकाराणां नामानि उल्लिख्यन्ते। पुनश्च उच्यते श्रुतिस्मृतिविरोधे श्रुतिरेव वलीयसीति 'धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः[1]। स्मृतिशास्त्रेषु तथा धर्मशास्त्रेषु समाजे तस्मिन् वेदार्थोपनिबन्धत्वान् मनुसंहिता श्रेष्ठतायाः उच्चशिखरे विराजमाना आसीत्–

''वेदार्थोपनिबन्धृत्वात् प्राधान्यं हि मनोः स्मृतम्।
मन्वर्थविपरीता तु या स्मृतिः सा न शस्यते [2]।।''

मानवधर्मज्ञापने मनुसंहितायाः अवदानम् अनस्वीकार्यम्। परन्तु अस्यां संहितायां मनुना मानवधर्मे किञ्चित् तारतम्यं प्रकटितम्, तत्तु इदानीन्तनदृष्ट्या भ्रान्तवत् प्रतीयते। ब्राह्मणादयः सर्वे मनुष्याः परमब्रह्मणोऽवयवभूताः अतः तत्र नास्ति कोऽपि भेदः। उच्यते पुरुषसूक्ते–

''ब्राह्मण्योऽस्य मुखमासीद्वाहुः राजन्यः कृतः।
ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रोऽजायत [3]।।''

अर्थात् तस्य परमपुरुष्यस्य मुखात् ब्राह्मणो बाहुभ्यां क्षत्रियः ऊरुभ्यां वैश्यः पद्भ्यांच शूद्रः अजायत। यद्यपि मुखं मनुष्याणां श्रेष्ठम् अङ्गम्, यतः अनेन एव एकतः अपरस्य स्वतन्त्रा परिचितिः ज्ञायते अतः एतदर्थम् अपराणि अङ्गानि तु निरर्थकानि इति न। परन्तु मनुना स्वेच्छाचारेण केवलं ब्राह्मणस्यैव श्रेष्ठत्वं ज्ञापितम्–

''उत्तमाङ्गोद्भवाज्जैष्ठ्याद् ब्रह्मणश्चैव धारणात्।
सर्वस्यैवास्य सर्गस्य धर्मतो ब्राह्मणः प्रभुः''[4]।।

वस्तुतः मानवशरीरस्य प्रत्येकानि अङ्गानि एव सगुणैः स्वतन्त्राणि। प्रत्येकेषां पृथक् पृथक् व्यवहार उपयोगिता च वर्तते। श्रवणेन्द्रियं यथा चक्षुरिन्द्रियस्य कार्यं साधितुम् असमर्थं तथैव चक्षुरिन्द्रियमपि श्रवणेन्द्रियस्य। ब्राह्मणादीनां मनुष्याणामपि तावदवस्था, वस्तुतः समाजे कस्यचिज्जनस्य कर्म न निर्देशितव्यम्। मनुष्याः स्वयोग्यतानुसारेण सामर्थ्यानुसारेण वा स्वाजीविकां ग्रहीतुं शक्नुवन्ति। अस्माकं भारतवर्षस्य श्रेष्ठधर्मग्रन्थे तथा श्रीमद्भागवद्गीतायां भगवता श्रीकृष्णेन मनुष्याः गुणानुसारेण तथा कर्मानुसारेण विभजिताः– ''चतुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः[5]।'' भगवदुक्तवचनानुसारेण जन्मना कोऽपि मनुष्यः न ब्राह्मणः क्षत्रियः वैश्यः शूद्रो वा। तेषां गुण एव तेषां परिचायकः। अनेन कर्मणा गुणेन वा क्षत्रियादयो मनुष्याः ब्राह्मणत्वं लब्धुं शक्नुवन्ति। पुनश्च ब्राह्मणादयोऽपि शूद्रत्वं प्राप्स्यन्ति। गुणेन ब्राह्मणत्वं विश्वामित्रेण केवलं लब्धम्, परन्तु परवर्तिकाले अयं दृष्टान्तः न दरीदृश्यते।
धर्मशास्त्रकारः मनुः स्वेच्छया ब्राह्मणानां श्रेष्ठत्वं ज्ञापितवान् अपि च तान् भगवत्तुल्यं कृतवान्–

''ब्राह्मणो जायमानो हि पृथिव्यामधिजायते।
ईश्वरः सर्वभूतानां धर्मकोषस्य गुप्तये।। '' [6]

अपरपक्षे शूद्रादीनां अवस्था खलु पशुवदासीत्। अस्माकं समाजस्य चालिकाशक्तिरेव कर्मजीविनः ते शूद्राः। आदिकालतः ते शूद्रा बुद्धिजीविभिः निष्पीडिताः। शूद्रा इत्यनेन दरिद्राः श्रमजीविनः मनुष्या एव बोध्यन्ते। वैदिककालाद्धि तेषां दुरवस्था दरीदृश्यते। ते तु वेदपाठे तथा श्रवणेऽपि वञ्चिताः आसन्। उच्यते नाटयशास्त्रे–

''न वेदव्यवहारो'यं संश्राव्यः शूद्रजातिषु।
तस्मात् सृजापरं वेदं पञ्चमं सार्ववर्णिकम् [7]।।''

वस्तुतः समाजस्य अधस्थानीया निम्नश्रेण्याः ते दलिताः समाजस्य सर्वोत्तमाः हितसाधकाः। शवदाहादीनि अस्पृश्यकर्माणि कृत्वा ते समाजस्य उपकारं साधयन्ति परन्तु ते कथम् अस्पृश्याः? तेषां कार्यविषये मनुना उक्तम्–

''शूद्राणां मासिकं कार्यं वपनं न्यायवर्त्तिनम्।
वैश्यवच्छोचकल्पश्च द्विजोच्छिष्टं च भोजनम् [8]।।''

अर्थात् स्वधर्मपरायणाः शूद्राः प्रतिमासं केशमुण्डणं वैश्यवत् अशौच ग्रहणं सर्वदा एव च ब्राह्मणस्य उच्छिष्टं खादिष्यन्तीति। उच्छिष्टग्रहणं वैज्ञानिकदृष्टया अतीव अस्वास्थ्यकरम्। इदानीन्तनकालेऽपि अस्य कुसंस्कारस्य प्रचलनं दरीदृश्यते। पुनश्च ब्राह्मणैः सह अपरासां जातीनां एकासने उषित्वा भोजनाय नृपकर्तृकेण दण्डविधानं प्राप्नुवन्ति। तत्र दण्डस्तु तेषां कटिदेशे तप्तलौहशलाकाविद्धम्–

''सहासनमभिप्रेप्सुरुत्कृष्टस्यापकृष्टजः।
कट्यां कृताङ्को निर्वास्यः स्फिचं वास्यावकर्त्तयेत् [9]।।''

ब्राह्मणास्तत्र सर्वेषां गृहे अतिथिरूपेण भगवत्तुल्या आसन् परन्तु ब्राह्मणस्य गृहे कस्यापि अतिथित्वं नासीत्–

''न ब्राह्मण्स्य त्वतिथिर्गृहे राजन्य उच्यते।
वैश्य शूद्रो सखा चैव ज्ञातयो गुरुरेव च [10]।।''

यदि वा केनापि कारणेन ब्राह्मणगृहे शूद्रः आगच्छति तर्हि ब्राह्मणस्य भृत्येन सह आहारो ग्रहणीयः इति विधिर्मनुना प्रदत्तः–

''वैश्यशूद्रावपि प्राप्तौ कुटुम्वेऽतिथिधर्मिणौ।
भोजयेत् सह भृत्यैस्तावानृशंस्यं प्रयोजनम् [11]।।''

यद्यपि मनुस्मृतिः वेदार्थप्रतिपादिका तथाप्यत्र तस्यावमानना दृश्यते। तैत्तिरीयोपनिषदि जातिधर्मनिर्विशेषेण मनुष्याणाम् अतिथित्वं प्रदत्तम्, न केवलं ब्राह्मणानाम्– 'अतिथिर्देवो भव।' क्षत्रियादीनां सुखाद्यग्रहणाय ब्राह्मणानां भोजनव्यवस्था मनुना कृता। मन्त्रादीना संस्काररहितं भोजनं न ग्रहणीयमिति विधानं तेन प्रदत्तम्–

''वृथाकृसरसंयावं पायसपूपमेव च।
अनुपाकृतमांसानि देवान्नानि हवींषि च [12]।।''

नरहत्यादिषु अपराधेषु ब्राह्मणाय दण्डविधानं तावत् नासीत्। अपरजातिवत् मृत्युदण्डविधानं ब्राह्मणेषु न प्रयुज्यते। नरहत्यायां ब्राह्मणस्य दण्ड आसीत् तेषां मस्तकमुण्डणं देशान्तरादिकं च। किन्तु समापराधे अपराणां मृत्युदण्ड एव धार्य आसीत्–

''मौण्डं न प्राणान्तिको दण्डो ब्राह्मणस्य विधीयते।
इतरेषान्तु वर्णानां दण्डः प्राणान्तिको भवेत्''[13]।।

अतः तेषां स्वैराचारेण समाजव्यवस्था दिनोत्तरमधोगामिनी भवति। सम्प्रति तत्तमान्धयुगस्य अवसानम् अभवत्।
मानवाः स्वकर्मगुणानुसारेण ब्राह्मणत्वादिकं प्राप्स्यन्ति इति विधिः मनुना न स्वीकृतः –

''अनार्य्यमार्य्यकर्मानमार्य्यंचानार्य्यकर्मिनम्।
सम्प्रधार्य्याव्रवीद्धाता न समौ नासमाविति [14]''।।

श्लोकेऽस्मिन् आर्यशब्दः ब्राह्मणस्य अनार्यशब्दश्च शूद्रस्य पर्यायवाचकरूपेणोल्लिख्येते। यद्यपि शूद्रः ब्राह्मणोचितकर्म ब्राह्मणाश्च शूद्रोचितकर्म करोति, तथापि ब्राह्मणस्य ब्रह्मणत्वमक्षुन्नं स्यात्, परन्तु शूद्रानां ब्राह्मणत्वप्राप्तिः कदापि न सम्भवति ब्राह्मणकर्मानधिकारत्वात्। भगवता व्यासेन प्रणीते महाभारते इयमेव रीतिः परिलक्ष्यते। यथा– अस्त्रगुरुद्रोणाचार्य एकलव्यं स्वशिष्यरूपेण स्वीकर्तुं नेच्छति, गुरुदक्षिणारूपेण तं निकषा वृद्धांगुलिप्रार्थनमित्यादयः धर्माः कस्यापि आदर्शगुरोः न सन्ति। तस्मिन्काले केनापि अब्राह्मणपण्डितेन ब्राह्मणव्यक्तिः दुष्यते उपदिश्यते वा, तर्हि अस्य कर्मणः शास्तिरूपेण तस्य वदने कर्णे च ज्वलन्ततैलं प्रविश्यते। उक्तं यत्–

''धर्मोपदेशं दर्पेण विप्रानमस्य कुर्वतः।
तप्तमासेचयेत् तैलं वक्त्रे श्रोत्रे च पार्थिवः [15]''।।

अधुनापि परम्परेयं परिलक्ष्यते। कोऽपि अब्राह्मणजनः शिक्षादीक्षादिभिः अतीव पण्डितः संस्कृतज्ञो भूत्वापि ब्राह्मणकुलाजातत्वात् पौरहित्यकर्म कर्तुं न शक्नोति। परन्तु अल्पशिक्षितोऽशिक्षितो ब्राह्मणः शुद्धसंस्कृतमन्त्रोच्चारणेऽसमर्थोऽपि देवपूजाधिकारी भवति। वैदिकपरम्परायाः अवलोपे सत्यपि वैदिकमन्त्रराजिः अविनश्वरास्ति। अधुना मन्त्रोच्चारणस्य तथा स्वरोच्चारणस्य कोऽपि विधिः न परिपाल्यते। परन्तु वैदिकयज्ञे स्वरोच्चारणमेव प्रधानमासीत्। स्वरोच्चारणत्रुटिः यज्ञकारिणः यजमानस्यैव अहितं साधयति। उदाह्रियते महाभाष्यकारेण–

दुष्टः शब्दो स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह ।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्।।

शूद्रानां धर्मोपदेशग्रहणे तथा ब्राह्मणादीनाम् उपदेशदाने निषेधतासीत्, तथाहि उक्तम्–

''न शूद्राय मतिं दद्यान्नोच्छिष्टं न हविष्कृतम्।
न चास्योपदिशेद् धर्मं न चास्य व्रतमादिशेत्'' [16]।।

मनोः धर्मशास्त्रे केवलं शूद्रादीनां दुरवस्थासीत् इति न, नारीणामपि अवस्था अतीव असमीचीना आसीत्। मनुः नारीणां स्वभावविषये उक्तम्– ''स्वभाव एष नारीणां नराणामिह दूषणम्'' [17]। अर्थात् पुरुषचरित्रदूषणमेव नारीणां स्वभावः इति। एतद्व्यतीतमपि उक्तं तेन–कुटिलतापरहिंसाकुत्सिदाचारादयः नारीणां स्वभावगताः।

''शय्याशनमलंकारं कामं क्रोधमनार्ज्जवम्।
द्रोहभावं कुचर्य्यांच स्त्रीभ्यो मनुवकल्पयत्''[17]।।

पुनश्च नारीणां कस्मिंश्चित् विषये स्वाधिकारी नासीत्। ताः पोष्यवत् परिगणिताः आसन्। स्वविषयेऽपि ताः नार्य्य आबाल्यात् पराधीनाः। ताः स्वविवाहविषयेऽपि मतपोषणे असमर्थाः। एतदवस्था न केवला साधारणनारीणां ब्राह्मणकुलजातानां नारीणामपि तादृशी अवस्था आसीत्। तासां यथा पौरहित्ये अधिकारो नासीत् तथैव स्वकीयमतग्रहणेऽपि। असत्पुरुषस्तथा कुपुरुषोऽपि नारीणां समीपे देवतुल्यो भवेदिति विधानं मनुना प्रदत्तम्–

''विशीलः कामवृत्तो वा गुणैर्वा परिवर्जितः।
उपचर्य्यः स्त्रिया साध्या सततं देववत् पतिः''[18]।।

युगस्य परिवर्त्तने यद्यपि नारीणां दुरवस्था काचित् प्रशमिता। परन्तु अधुनापि पुरुषतान्त्रिकतायां नार्य्यः न सर्वत्र स्वाधीनाः।

शोधप्रबन्धेऽस्मिन् मनुप्रणीते धर्मशास्त्रे मानवधर्मलंघनस्य बहुविधाः दृष्टान्ताः उल्लिखिताः। परन्तु लघुप्रबन्धेऽस्मिन् सर्वाणि तथ्यानि उल्लिखितुमसमर्थः। एतद्व्यतीत्य मनुः तद्ग्रन्थे केवलं ब्राह्मणस्य सपक्षे उक्तमिति न, तेषां किं न करणीयमेतदपि उक्तम्। परन्तु तत्काले ब्राह्मणाः शास्त्रार्थस्य सम्यगर्थं न ज्ञापितवन्तः जनमानसे। पुनश्च अपरं जातित्रयं तु अल्पज्ञतावशात् शास्त्रार्थज्ञानेऽसमर्थमासीत्। यद्वा भवतु समाजे तस्मिन् मनुसंहितायाः अधिकप्रभावत्वात् मनुष्येषु अस्याः सुप्रभावः आसीत् तथैव कुप्रभावोऽपि। समाजेऽस्मिन्नपि तस्य किंचित्प्रभावः अल्पज्ञेषु विद्यते। सर्वान्तिमे एतत् वक्तव्यम् अस्मासु साम्प्रदायिकारणेन कोऽपि भेदो न स्यात्। अस्माकं चिन्तनं समानं स्यादिति शम्–

''समानी व आकुतिः समाना हृदयानि वः।
समानमस्तु वो मनो यथा वः सुसहासति''।।

**तथ्यसूत्राणि–**

1. मनुसंहिता, सम्पा. मानवेन्दुवन्द्योपाध्यायः, 2.13।
2. मनुसंहिता, सम्पा. अशोककुमारवन्द्योपाध्यायः, भूमिका पृष्ठांकः 5।
3. पुरुषसूक्तम् 10.90.12।
4. मनुसंहिता, सम्पा. मानवेन्दुवन्द्योपाध्याय, 1.93।
5. श्रीमद्भागवद्गीता 4.13।
6. मनुसंहिता, सम्पा. मानवेन्दुवन्द्योपाध्याय, 1.99।
7. नाट्यशास्त्रम् 1.12।
8. मनुसंहिता, सम्पा. मानवेन्दुवन्द्योपाध्याय 5.140।
9. मनुसंहिता, सम्पा. मानवेन्दुवन्द्योपाध्याय, 8.281।
10. मनुसंहिता, सम्पा. मानवेन्दुवन्द्योपाध्याय, 3.110।
11. मनुसंहिता, सम्पा. मानवेन्दुवन्द्योपाध्याय, 3.112।
12. मनुसंहिता, सम्पा. मानवेन्दुवन्द्योपाध्याय, 5.7।
13. मनुसंहिता, सम्पा. मानवेन्दुवन्द्योपाध्याय, 8.379।
14. मनुसंहिता, सम्पा. मानवेन्दुवन्द्योपाध्याय, 10.46।
15. मनुसंहिता, सम्पा. मानवेन्दुवन्द्योपाध्याय, 8.272।
16. मनुसंहिता, सम्पा. मानवेन्दुवन्द्योपाध्याय, 4.80।
17. मनुसंहिता, सम्पा. मानवेन्दुवन्द्योपाध्याय 9.17।
18. मनुसंहिता, सम्पा. मानवेन्दुवन्द्योपाध्याय 5.154।

**अनुशीलितग्रन्थपञ्जी–**


1. मनुसंहिता, सम्पा. मानवेन्दुवन्द्योपाध्यायः, कलिकाता, संस्कृत पुस्तक भाण्डार, 2016, पुनर्मुद्रितः।
2. मिश्र जलदिन्दु, दर्शन ओ धर्मेर संस्कार, कलिकाता, एफ.डि. 444. सल्टलेक, 2008।
3. मनुसंहिता, सम्पा. अन्नदाशंकरपाहाडी, कलिकाता, संस्कृत वुक डिपो, 2004।
4. मनुसंहिता, सम्पा. उपेन्द्रमुखोपाध्यायः, कलिकाता, वसुमति साहित्य मन्दिर।
5. मनुसंहिता, सम्पा. अशोककुमारवन्द्योपाध्यायः, कलिकाता, सदेश।
6. श्रीमद्भागवद्गीता, सम्पा. जगदीशचन्द्रशास्त्री, कलिकाता, प्रेसिडेन्सी लाइब्रेरी, 1380 वंगाब्दः।